विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग नवम्  विषय संस्कृत विषयशिक्षक श्यामउदय सिंह

ता: 10-08-2021-2021 (एन.सी.ई.आर. टी. पर आधारित )

पाठ: अष्टम: पाठनाम लौह तुला

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. **देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः किं व्यचिन्तयत्?**
   ii. **स्वतुलां याचमानं जीर्णधनं श्रेष्ठी किम् अकथयत्?**
   iii. **जीर्णधनः गिरिगुहाद्वारं कया आच्छाद्य गृहमागतः?**
   iv. **स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं किम् उवाच?**
   v. **धर्माधिकारिभिः जीर्णधनश्रेष्ठिनौ कथं सन्तोषितौ?**

**उत्तराणि-**

vi. देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः व्यचिन्तयत् - यत्र देशे अथवा स्थाने स्ववीर्यतः भोगाः भुक्ताः तस्मिन् स्थाने यः विभवहीनः वसेत् सः पुरुषाधमः भवति।

vii. स्वतुलां याचमानं जीर्णधनं श्रेष्ठी अकथयत् - "भोः ! नास्ति सा, त्वदीया तुला मूषकैः भक्षिता।"

viii. जीर्णधनः गिरिगुहाद्वारं बृहत्-शिलया (बृहच्छिलया) आच्छाद्य गृहमागतः।

ix. स्नानान्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं उवाच - 'नदीतटात् सः श्येनेन हृतः।'

x. धर्माधिकारिभिः जीर्णधनश्रेष्ठिनौ परस्परं तुला-शिशु प्रदानेन सन्तोषितौ।